International Journal of Sanskrit Research 2021; 7(1): 210-215

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 210-215
© 2021 IJSR
www.anantaajournal.com
Received: 11-11-2020
Accepted: 20-12-2020

**हरीशबहुगुणा**
शोधार्थी,
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत
विद्यापीठः, नवदेहली, भारत

**Corresponding Author:**
**हरीशबहुगुणा**
शोधार्थी,
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत
विद्यापीठः, नवदेहली, भारत

# समवायः पदार्थः

## हरीशबहुगुणा

**भूमिका-**
विविधदुःखपयः पूरपूरितेऽमुस्मिन् संसारे भवाम्बुधौ निमज्जतां मानवानां समुद्धवारणाय परं कारुणिकमाहात्मभिः धर्मार्थकाममोक्षार्थेषु चतुर्विधपुरुषार्थेषु मोक्षमेव निरपायोपयोगी तत्तद्दर्शनं मन्वानयिः प्रणिन्ये । तेषु च दर्शनेषु –

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षकीमता ॥[1]

सेयमान्वीक्षकी विद्या न्यायविद्या इत्युच्यते । तत्रन्यायवैशेषिकदर्शनयोः समानतन्त्रत्वात् न्यायदर्शनोक्त "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क-निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निः-श्रेयसाधिगमानां"[2] षोडशपदार्थानां वैशिषिकोक्तसप्तपदार्थेष्वन्तर्भवति ।
ते च पदार्थाः –

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थः सप्तकीर्तितः ॥[3]

तेषु च वैशिषिकोक्त सप्तदार्थेषु षष्ठः समवायपदार्थोऽस्ति । समवायः द्वयोः भिन्नपदार्थयोः मध्येऽभिन्नाकारप्रतीतिः भवति सा प्रतीतिः समवायवशदेव, यथा तन्तुपटयोर्मध्ये भेदे सत्यभिन्नाकारा या प्रतीतिः सा प्रतीतिः तन्तुपटयोर्मध्ये विद्यमानस्य समवायसम्बन्धवशादेव । समवायसम्बन्धस्य विषये फ्राउवाल्नरमहोदयो वदति - यत् समवायपदार्थः वैशेषिकदर्शनस्य सिद्धान्तानां तीक्ष्णतायारुदाहरणमस्ति । यद्वशाद् वैशेषिकदर्शनमन्यभारतीयदर्शनेभ्यः विशिष्टः प्रतीयते[4] ।
समवायसम्बन्धाभात् तन्तुपटयोर्मध्ये या अभिन्नाकारा प्रतीतिः सा भवितुं नार्हति । अतो समवायसम्बन्धः स्वमहत्त्वं प्रतीपादयति वैशिषिकदर्शने ।

---

[11] कौ.अ. १/१२
[2] न्याय.सू. १/१/१
[3] न्या.मु. २
[4] This category is again an example of the acuteness and clarily of the building up ideas which distinguishes the Vaisheshika system of the classical time. - Frauwallner, HIP, vol. 2nd, p.105

तस्य महत्त्वप्रतिपादने धर्मेन्द्रनाथशास्त्रिणोच्यते यत् – पूर्वोक्तपञ्चपदार्थानां द्रव्यगुणकर्मसामान्यविशेषानां स्थिरतासमवायसम्बन्धवाशादेव, यथा –
गृहार्थमिष्टिकासमः वर्तते । समवायः इष्टिकानां मध्ये सम्बन्धस्य सामग्री वर्त्तते [5]। समवायाभावात्तेषां पदार्थानां एकेन सहापरस्य सम्बन्धः न भवितुमर्हति ।

**समवायस्य लक्षणम् –**

व्युत्पत्तिं लभ्यसमवायपदस्यार्थः "अत्यन्तसमीपः" इति [6] । वैशेषिकदर्शनस्याद्यवक्त्रा महर्षिकणादेन समवायं निरूपयन्नुच्यते यत् "कारणे कार्ये च,अत्र कारणे कार्यमस्ति एतादृशीप्रतीतिः यत्र भवति तदेव समवायः" [7] । वैदिकवृत्तिकारः वदति – "येन असर्वगतं,अन्यत्वमधिगतपदार्थानाम् अपृथगाभावो भवति, अथवा स्वातन्त्र्यो भवति तदेव समवायः"[8]। प्रशस्तपादभाष्ये यथा – "एकाश्रयः अपरः आश्रितः इत्यादि प्रत्ययस्य अयुतसिद्धयोः सम्वन्धः स समवायः"[9] । उदयनाचार्येण किरणावल्यामुच्यते – "अयुताः प्राप्ताश्च ते सिद्धाश्चेत्ययुतसिद्धाः प्राप्ता एव सन्ति न वियुक्ता इति यावत् तेषां सम्बन्धः प्राप्तिलक्षणः समवायः । ..... तथा च नित्या प्राप्तिः समवायः इति लक्षणं सूचितं भवति"[10] । तत्र किरणावल्याः व्याख्याकारः पद्मनाभो प्राप्तिलक्षणस्य व्याख्याकर्तुं वदति – यत् समवायस्थले सम्बन्धीद्वयं सदा सम्बन्धं भूत्वा वर्त्तते [11] । लक्षणावल्यामुदयनाचार्येण समवायस्य नित्यसम्बन्धत्वमङ्गीक्रियते । अथवा – " समवेतत्वरहितम्, सर्वान्योन्याभावस्य सामान्याधिकरणभावः एव समवायः [12] । शिवादित्यमते समवायः नित्यः यः सर्वदा असमवेत भवति नतु समवायेन सम्बन्धेन वर्त्तते [13] । वादिवागीश्वरमते तु – इहप्रत्ययस्य विषयीभावः नित्य-समबन्ध एव समवायः[14] । शङ्करमिश्रमते असमवेतभावत्वमेव समवायत्वम् इति । तथा च –

"तत्रासमवेतभावत्वं समवायत्वम् ।
स्वाश्रयान्योन्याभावासमानाधिकरणपदार्थ-
विभाजकोपाधिमत्त्वं वा
स्वाश्रयातिरिक्तपदार्थमात्रप्रतियोगिकान्योन्याभाव-
समानाधिकरणपदार्थविभागजकोपाधिमत्त्वं वा"[15] ।

न्यायसिद्धान्तमुक्तावल्यां विश्वनाथो वदति – घटादीनां कपालादौ यस्सम्बन्धः स समवायः । तथा च –

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥[16]
"समवायं दर्शयति – घटादीनामिति ।
अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः"[17] ।

अन्नमभट्टश्च – "नित्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिः"[18] ।
तत्र समवयस्य विश्लेषणमिदं तया कर्तुं शक्यते –

1. समवायः कारणवादे आधृतः सम्बन्धः अस्ति ।
2. समवायः एकः सम्वन्धः अस्ति ।
3. समवायः द्वयोरधिकेषु वा अयुतसिद्धपदार्थेषु मध्ये वर्त्तन् सम्बन्धः अस्ति ।
4. समवायः नित्यः सम्बन्धः अस्ति ।
5. समवायः एक अस्ति ।
6. समवायः संयोगाद् भिन्न अस्ति ।
7. समवायः पदार्थः अस्ति ।
8. समवायः समवायेन न विद्यतेऽपितु सम्बन्धिषु स्वरूपेण वर्त्तते ।
9. समवायः प्रत्यक्षं नास्ति, अनुमेयमस्ति ।
10. समवायः गुणान् कर्माणि सामान्यं विशेषान् द्रव्येण सह योजयति । तथा च सामान्यस्य गुणेभ्यः कर्मभ्यः योजयति । अवयवी च अवयवान् योजयति ।

**समवायस्य सिद्धिः –**

समवायस्य सिद्धिः प्रत्यक्षेण न भवितुमर्हति । अतो अनुमानेन समवायसिद्धिः भवति । तत्र चानुमानम् – यथा पात्रे दध्यस्ति, तत्र सा प्रतीतिः संयोगेन सम्बन्धेन भवति । तथैव तन्तुषु पटः, वीरणेषु कटः, द्रव्ये गुणकर्माणि इत्यादि प्रतीतेराधारः य सम्बन्धः स एव समवाय इति[19] । न्यायमञ्जरीकारेण समवायसिद्धावुच्यते –

प्रतीतिभेदाद् भेदोऽस्ति देशभेदस्तु नेष्यते ।
तेनात्र कल्प्यते वृत्तिः समवायः स उच्यते ॥[20]

---

[5] If the first five categories, substance, quality, etc. are the bricks of the Nyaya-Vaisheshika structre, the mortar to unite them is provided by the sixth category – samavya ; - Shastri, CIR, p. 375
[6] समवाय्यते इति । सम् + अव् + अच् + घञ् । समूहः इत्यमरः । .... सम्बन्धविशेषः । श. क. द्रु. पञ्चमो भागः, पृ.२७०
[7] इहेदमिति यतः कार्यकारणयोः स समवायः । - वै. सू. ७/२/२६
[8] यतश्चासर्वगतानामधिगतान्यत्वानामपृथगभावः । अस्वातन्त्र्यमिति यावत्स समवाय इति भावः ॥ - वै. सू. वै. वृ, पृ. १६१
[9] इह प्रत्ययहेतुः स समवायः – प्र. पा. भा
[10] किरणा. भा.,पृ. १३०
[11] समवायस्थले उभौ विद्यमानौ सम्बद्धावेवेति भावः । किरणा. भा.,पृ. ४७
[12] नित्यसम्बन्धः समवायः । समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणाभावो वा । लक्षणा. पृ. १५
[13] नित्यसम्बन्धः समवायः । स. प. पृ.६१
[14] नित्यसम्बन्धः समवायः । इहप्रत्ययविषयीभावः । मा. मनो. पृ- १३०
[15] क. र.,पृ-१६९
[16] न्या, सि. मु. -११
[17] न्या, सि. मु. -११
[18] त. सं. पृ- ६१
[19] प्र. पा. भा.
[20] न्या. मं.,भाग १ पृ. २८५

वादिवागीश्वरः समवायसिद्धये वदति –

विवादास्पदं घटसम्बद्धं, द्रव्यत्वाद् आत्मवत् ।
विवादास्पदं नित्यसम्बन्धेन सम्बद्धं, द्रव्यत्वाकाशवत् ॥[21]

कणादरहस्ये शङ्करमिश्र समवायसिद्धयेऽनुमानं वदति –यदि समवायसिद्धये किमत्र प्रमाणमिति शङ्का भवति तर्हि विशिष्टबुद्धेः विशेषण-विशेष्यस्वरूपमात्राद् घटिते सति ? अस्याः शङ्कायारुत्तरं भवति यत् – इहबुद्धेः कारणत्वादेव समवायसिद्धौ प्रमाणम् । अर्थात् तन्तुषु पटः इत्यादि प्रतीतेः यत्कारणं तदेव समवायः । तथा हि –

"किमत्र प्रमाणं विशिष्टबुद्धेर्विशेषस्य-स्वरूपमात्रघटितत्वादिति चेत्? इहेति बुद्धेः कारणत्वेन तत् सिद्धेः । भवतीह तन्तुषु पट इह पटे रूपत्वमिह पटे उत्क्षेपणमित्यादिप्रतीतिः । सा च सम्बन्धनिमित्ता दृष्टा"[22] ।

विश्वनाथः समवायसिद्धौ वदति – "तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन संयोगादिबाधात् समवायसिद्धिः"[23] ।

अन्नमभट्टश्च तर्कदीपिकायां वदति समवायसिद्धये – "नीलो घट इति विशिष्टप्रतीतिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टप्रत्ययत्वाद्दण्डीति प्रत्ययवदिति समवायसिद्धिः"[24]।

**समवायः कारणवादे आधृतसम्बन्धः –**

न्यायवैशेषिकदर्शने कारणसम्बधीमतम् "असत्कार्यवादः" "आरम्भवादश्च" अस्ति । तत्र कारणं कार्यं च भिन्नं-भिन्नमस्ति न्यायवैशेषिके दर्शने । तथा च कार्यं कारणे समवायेन वर्त्तते । तथा हि कारणव्यापारे सति नवीनकार्यस्योत्पत्तिः दृश्यते । एवं च कार्यं ध्वंशानन्तरं नष्टः भवति न तस्य लय इति । तत्र अयोगोलके विद्यमानवह्निः यथा अभिन्नः प्रतीयते तथैव समवायसम्बन्धवशादेव कार्यं कारणे भेदे सति भिन्न प्रतीयते[25] । तत्र फ्राउवाल्जर मते आरम्भे अवयवी स्वावयवेषु सम्बन्धः भवति, एतदेवाधारं समवायस्य स्थापनाया इति[26] । विश्वनाथस्तु लाघवार्थं समावायसिद्धिः यतो हि स्वरूपाणां सम्बन्धकल्पने अनन्तानां स्वरूपाणां कल्पना तस्माद् गौरवदोषः[27] ।

**समवाय एकः सम्बन्धः –**

समवायः नित्यः सम्बन्धः वर्त्तते । तत्र तर्कसंग्रहे प्राप्यते यत् सम्बन्धस्तु विशिष्टप्रतीतिनियामकं भवति [28] । न्यायसिद्धान्तमुक्तावल्याः प्रभाटीकाकारः वदति यत् – "सम्बन्धिभिन्नत्वे सति सम्बन्धप्रतीतिनियामकत्वं सम्बन्धसामान्यलक्षणम्"[29] । पाश्चात्यदर्शनस्य यथा – सम्बन्धः विशेषणविधेयाभ्यां पृथगस्ति । विशेषणं तु केवलं विधेयस्यांशमात्रमस्ति । सम्बन्धस्तु विधेयतायां तस्याः विशेष्यतारूपेण सम्मिलितोऽस्ति[30] ।

तत्र गदाधरो वदति यत् –" शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते"[31] । भाष्यकारो वदति – "स च द्रव्यादिभ्यः पदार्थान्तरम् भाववल्लक्षणभेदात् । यथा भावस्य द्रव्यत्वादीनाम् स्वाधारेषु आत्मानुरूपप्रत्ययकर्तृत्वात् स्वाश्रयादिभ्यः परस्परतश्चार्थान्तरभावः तथा समवायस्यापि पञ्चसु पदार्थेष्विहेतिप्रत्ययदर्शनात् तेभ्यः पदार्थान्तरत्वम् इति । न च संयोगवन्नानात्वं भाववल्लिङ्गाविशेषात् विशेषलिङ्गाभावाच्च तस्माद्भाववत् सर्वत्रैकः समवाय इति"[32] ।

**समवायः द्वयोरधिकेषु वा अयुतसिद्धपदार्थेषु मध्ये वर्त्तन् सम्बन्धः अस्ति –**

"समवायः अयुतसिद्धवृत्तिसम्बन्धः अस्ति । अयुतसिद्धश्च – सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वमियन्तु नित्यानाम् अनित्यानां तु तेष्वाश्रयेषु समवायोऽयुतसिद्धिरिति" [33] । तत्र सूक्तिटीकाकारेण अयुतसिद्धाभ्यां लक्षणं अपृथग्युभूतमित्युच्य क्रियते-"अयुतसिद्धानामपृथग्भूतानां सर्वदा मिथः समवेतानामिति यावत्" [34] । तथा च – "अयुतसिद्धिश्चोभयोरसम्बन्द्धयोरविद्यमानता" [35] । सप्तपदार्थ्यां शिवादित्यः वदति यत् – "अविद्यमानाधारस्य आधेयस्य च सन्बन्धः अयुतसिद्ध इति" । तथा हि –

"अविद्यमानयोः आधाराधेययोः सम्बन्धो अयुतसिद्धिः" [36] । शङ्करमिश्रमते द्वयोः असम्बद्धपदार्थयोः अविद्यमानता पृथग्भूत्वा न वर्त्तते तावेवायुतसिद्धौ – "असम्बद्धयोरविद्यमानत्वमयुतसिद्धिः" [37] । अन्नमभट्टश्च -

---

[21]मा. मनो. पृ - १२८
[22]क. र. पृ. १६९
[23]न्या. सि. मु. -११
[24]त. दी. पृ. ६२
[25]अत्र सम्बन्धिनौ अयः पिण्ड-वह्निवत् पिण्डीभूतावेव प्रतीयते । न्या. क. पृ. - ७५२
[26] " exactly considered, the relation of whole (avayavi) to it's parts appears to have been the formulation of the category of inherence.,' - frauwallner, EIP, vol. 2nd, p. 246, n.197
[27]अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धिः । न्या. सि. मु. का. ११

[28]सम्बन्धत्वं विशिष्टप्रतीतिनियामकत्वम् – न्या. बो. त. सं. पृ. ६२
[29]प्रभा (न्या. मु. )
[30] A relation..... Is that which is invoved in the predication or characterization by an adjective of a substantive......'-N.S. Dravid, 'problem of relation in Indian philosophy', IPQ, Vol. V-1, p. 40, October
[31]व्यु.वा.
[32]प्र. पा. भा. १.(३.६.१.)
[33]प्र. पा. भा. पृ. ११४-११५
[34]सूक्ति (प्र. पा. भा. ) पृ ५८
[35]वही..
[36]स. प., पृ. १५२
[37]उप., पृ.४४०-४१

"ययोर्द्वयोर्मध्य एकमविनश्यदपराश्रितमेवावतिष्ठते, तावयुतसिद्धौ [38]" । तर्कभाषाकारः केशवमिश्रश्च वदति यत् –

तावेवायुतसिद्धौ द्वौ विज्ञातव्यो ययोर्द्वयोः ।
एकम् अविनश्यदपराश्रितमेवावतिष्ठते ।।[39]

न्यायबोधिन्यां हि – यत्र कालनिरूपिताधेयतासामान्यं येनावच्छिन्ना भवति, तयोर्द्वयोर्मध्ये एक अयुतसिद्धः भवति – "यन्निष्ठकालनिरूपिताधेयतासामान्यं यदवच्छिन्नं तदुभयान्तरत्वमयुतसिद्धत्वमित्यर्थः"[40] ।

भाष्यकारश्च – "अयुतसिद्धानाम् आधार्याधारभूतानाम् यः सम्बन्ध इहप्रत्ययहेतुः स समवायः । द्रव्यगुणकर्मसामान्यविशेषाणाम् कार्यकारणभूतानाम् अकार्यकारणभूतानां वायुतसिद्धानाम् आधार्याधारभावेनावस्थितानाम् इहेदम् इतिबुद्धिर्यतो भवति यतश्चासर्वगतानाम् अधिगतान्यत्वानाम् अविष्वग्भावः स समवायाख्यः सम्बन्धः । कथं? यथेह कुण्डे दधीतिप्रत्ययः सम्बन्धे सति दृष्टस्तथेह तन्तुषु पटः इह वीरणेषु कटः इह द्रव्ये गुणकरणी इह द्रव्यगुणकर्मसु सत्ता इह द्रव्ये द्रव्यत्वम् इह गुणे गुणत्वम् इह कर्मणि कर्मत्वम् इह नित्यद्रव्येऽन्त्या विशेषा इतिप्रत्ययदर्शनाद् अस्त्येषाम् सम्बन्ध इति ज्ञायते"[41] ।

**समवायः नित्यः सम्बन्धः अस्ति –**

समवायोऽस्ति नित्यः सम्बन्धः, तत्र सम्बन्धस्य एकः प्रतियोगी अपरश्चानुयोगी भवति । तत्र समवायवशादेव प्रतियोगी पटस्य, अनुयोगी तन्तुषु वर्त्तमानता भवति । उभयोश्च मध्ये या अभिन्नता सा समवायवशादेव भवति । भाष्यकारः समवायस्य नित्यत्वसिद्धये वदति -

"ननु यद्येकः समवायो द्रव्यगुणकर्मणाम् द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह सम्बन्धैकत्वात्पदार्थसङ्करप्रसङ्ग इति न आधाराधेयनियमात् । यद्यप्येकः समवायः सर्वत्र स्वतन्त्रः तथाप्याधाराधेयनियमोऽस्ति । कथम् ? द्रव्येष्वेव द्रव्यत्वम्, गुणेष्वेव गुणत्वम्, कर्मस्ववेव कर्मत्वम् इति । एवमादि कस्माद् अन्वयव्यतिरेकदर्शनात् । इहेतिसमवायनिमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते । द्रव्यत्वादिनिमित्तानाम् व्यतिरेकदर्शनात् प्रतिनियमो ज्ञायते । यथा कुण्डदध्नोः सम्योगैकत्वे भवत्याश्रयाश्रयिभावनियमः । तथा द्रव्यत्वादीनाम् अपि समवायैकत्वे ऽपि व्यङ्ग्यव्यंजकशक्तिभेदाद् आधाराधेयनियम इति"[42] ।

तत्र मानमनोहरकारः समवायस्य नित्यत्वसिद्धये वदति - "विवादास्पदं नित्यसम्बन्धेन सम्बद्धं, द्रव्यत्वाद् आकाशवत्" [43] । समवायस्य सिद्धये इह-प्रत्ययस्य सार्वदेशिकत्वमेव प्रमाणमिति कणादरहस्ये शंकरमिश्रः – "नित्यत्वे किं प्रमाणमिति चेत् इहेति प्रत्ययस्यापि सार्वदिक्त्वम् । तच्च निमित्तसदातनत्वाधीनम् । रूपादौ च रूपत्वादिसमवायस्यानित्यत्वे समवायिकारणसमवायिकारणकत्वं वक्तव्यम्"[44] । तर्कसंग्रहे यथा- "नित्यम् एकम् अनेकानुगतं सामान्यम्"[45] । तथा च विश्वनाथः – "नित्यत्वे सत्यनेकसमवेतत्वं सामान्यम्" [46] । भाष्ये च - "सम्बन्धनित्यत्वेऽपि न सम्योगवद् अनित्यत्वं भाववद् अकारणत्वात् । यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव इत्युक्तम् तथा समवायोऽपीति । न ह्यस्य किञ्चित् कारणम् प्रमाणत उपलभ्यते इति । कया पुनर् वृत्त्या द्रव्यादिषु समवायो वर्तते । न सम्योगः सम्भवति तस्य गुणत्वेन द्रव्याश्रितत्वात् । नापि समवायस् तस्यैकत्वात् न चान्या वृत्तिर् अस्तीति"[47] ।

**समवायः एक अस्ति –**

सूत्रे महर्षिकणादेन समवायस्य एकता सत्तायारेकतया व्याख्यायते – "तत्त्वं भावेन" [48] । तर्कसंग्रहे वदत्यन्नमभट्टः – यतो हि समवायस्त्वेकैव इति "समवायस्त्वेक एव" [49] । उदयनाचार्येणसमवायस्यैकत्वाभिप्रायेणोच्यते यत् समवायस्यैकत्वात् तस्य विभागो नास्ति – "समवायस्यैकत्वाद्विभागो नास्तीति"[50] ।

मानमनोहरकारेण समवायस्यैकत्व सिद्धयेऽनुमानम् आश्रयते - "विवादाध्यासिताः शब्दा आकाशसमवायेनेव समवायिनः, समवायित्वात् शब्दाकाशवत्। न च समवायस्यैकत्वे वस्तुप्रसङ्गः, तस्य समस्तविश्वसङ्करत्वेनैव परिकल्पितवात्"[51] ।

उपस्कारकर्त्ता वदति यथा सत्ता पदार्थेषु सदस्ति, सदस्ति इति प्रतीतेः कारणं भवति । तथा हि समवायसम्बन्धः सर्वत्र "समवेत" अस्तीति प्रतीतेः हेतुरस्ति – "यथैका सत्ता सर्वत्र सद्बुद्धिप्रवर्त्तिका तथैक समवायः सर्वत्र समवेतबुद्धिप्रवर्त्तकः स्वलिङ्गाविशेषलिङ्गाभावाच्च, न हि समवायस्य विशेषलिङ्गकं भेदकं लिङ्गमाकलयामो येन नानात्वमभुपगच्छामः"[52] । तथा च विश्वनाथोऽपि स्वरूपाणां आनन्त्यादानन्त्यदोषवारणाय एकसमवायसिद्धिः - "अनन्तस्वरूपाणां सम्बन्धत्वकल्पने

[38]त. सं. पृ. ६१
[39]त. भा.
[40]न्या. बो. (त. सं.) पृ. ६२
[41]प्र. पा. भा. १.(३.४.१.)
[42]प्र. पा. भा. १.(३.७.९.)
[43]मा. मनो., पृ. १२८
[44]क. र. पृ. १७०
[45]त. सं
[46]न्या. सि. मु. ११
[47]प्र. पा. भा. १.(३.८.१.)
[48]वै. सू. ७/२/२८
[49]त. सं., त. दी. पृ. ६
[50]किरणा. पृ. २५
[51]मा. मनो. पृ.. १३०
[52]उप., पृ. ४४५

गौरवाल्लाघवादेकसमवायसिद्धिः" [53] । रघुनाथशिरोमणिः समवायस्यानेकत्वं स्वीकरोति – "समवायोऽपि च नैको जलादे र्गन्धादिमत्त्वप्रसङ्गात् परन्तु नानैव । समवायत्वं तु पुनरनुगतम् अखण्डोपाधिरिति" [54] । रघुनाथशिरोमणेः परवर्त्ती आचार्यः वेणीदत्तः समवायस्य नानात्वं साधयति – "समवायोऽपि च नैको जलादेर्गन्धादिमत्त्वप्रसङ्गात् । परन्तु नानैव" [55] । तत्र न्यायसिद्धान्तमुक्तावल्याः दिनकरी टीकाकारेणोच्यतेरघुनाथशिरोमणेः वेणीदत्तस्य वा मतमादाय – "पृथिव्यां गन्धस्य समवायः, न जले इत्यादिप्रतीतेः समवायस्य नानात्वमिति तु नव्याः"[56] । तत्र प्रभाकरः एकस्यैव समवायस्य नानास्वरूपाणां कल्पनोचिता – "यद्यपि लाघवादेकसमवायवादिनः प्राचीनस्य मते नैव दोषः तथापि "पृथिव्यां गन्धस्य समवायो न जले" इत्यादि – प्रतीतेर्नानासमवायवादिनो नव्यस्य मते नोक्तानुमानेन समवायसिद्धिः । किन्तु नानासमवायकल्पनापेक्षया उपस्थितानां नानास्वरूपाणामेव स्वीकारो वरः उपस्थितम्परित्यज्यानुपस्थितकल्पनायां मानाभावात्" [57] ।तत्र शङ्करमिश्रेणोच्यते प्रभाकरमतखण्डने – " समवायो नानाऽनित्यश्चेति प्राभाकराः । तच्चानुपपन्नम्, रूपं नष्टमिति हि प्रत्ययो न तु रूपसमवायो नष्ट इति कस्यापि प्रत्ययः" । तत्रोद्योतकरेण समवायस्य व्यापकत्वं स्वीक्रियते - "परमाणुवदनाश्रितः समवाय इति न्यायः व्यापकत्वे सतीहबुद्धिनिमित्तत्वात्"[58] ।

**समवायः संयोगाद् भिन्न अस्ति –**

समवायः संयोगाद्भिन्न इति भाष्यकारः निरूपयति – "न चासौ संयोगः सम्बन्धिनामयुतसिद्धत्वात्" [59] । श्रीधराचार्यः वदति संयोस्य प्रतियोग्यनुयोगी मध्ये स्पष्टतः प्रतीतिः स्यादिति । किन्तु समवाये न तथा – "संयोगे हि द्वयोः संसर्गाभासः समवायस्य पुनरेष महिमा यदत्र सम्बन्धि-नावयः पिण्डवह्निवत् पिण्डीभूतावेव प्रतीयेते" [60] । इति न्यायवैशेषिकदर्शने समवायोऽस्ति संयोगात्पृथगिति ।

**समवायः अस्ति पदार्थः द्रव्यादिभिन्न –**

समवायः द्रव्यादिषट्पदार्थादतिरिक्तः पदार्थ इति । तत्र समवायस्यातिरिक्तपदार्थ कल्पने स्वमेव सूत्रकारो वदति – "द्रव्यत्वगुणत्वप्रतिषेधो भावेन व्याख्यातः"[61]। समवायो न तत्र स्वाश्रयेषु संयोगेन वर्त्तते यतो हि संयोगः गुणः स च द्रव्ययोरेव । स च समवायः स्वाश्रयेषु न तु संयोगेन वर्त्तते, न च समवायेन, अपितु समवायः स्वाश्रयेषु स्वरूपसम्बन्धेन वर्त्तते । तथा च – "सामान्यादीनां त्रयाणां स्वात्मसमत्वम्"[62] ।
समवायस्य समवायेन अवृत्तिसिद्धये सप्तपदार्थीकारेण उल्लिख्यते यत् समवायः असमवेतपदार्थः – "समवायाभावावसमवेतावेव" । तत्र अवयविनि द्रव्येऽवयवः समवायेन वर्त्तते, गुणाः, कर्माणि, सामान्यम्, विशेषाश्च, द्रव्ये समवायेन वर्त्तन्ते –

"द्रव्यादीनां पञ्चानां समवायित्वम् ...." [63] । "समवायित्वं समवायलक्षणा वृत्तिः"[64] ।

स च समवाय एकः स्वतन्त्रश्च – "यद्यप्येकः समवायः सर्वत्र स्वस्तन्त्रः"[65] ।

पञ्चपदार्थवृत्तिशब्दविषयत्वात् परमाणुवदनाश्रितः समवाय इति ।

स च समवायः अतीन्द्रियः पदार्थः यतोहि तस्य इन्द्रियैः प्रत्यक्षं न भवति इति – "अत एवातीन्द्रियः सत्तादीनाम् इव प्रत्यक्षेषु वृत्त्यभावात् स्वात्मगतसंवेदनाभावाच् च । तस्माद् इहबुद्ध्यनुमेयः समवाय इति"[66] ।

**रामानुजस्य अपृथक्सिद्धिसम्बन्धः –**

रामानुजस्यापृथक्सिद्धिपदार्थः समवायवत्प्रतीयते । यतोहि समवायः यथा द्रव्याणां गुणं, कर्म, सामान्यं, विशेषं वा प्रति योजयति तद्वत्समवायोऽपि । अपृथक्सिद्धिः सम्वन्धेऽपि सम्बन्ध्योर्मध्ये भेदः अपृथक्करणीयताऽस्ति । किन्तु समवायात् स सम्बन्धः इदंतया पृथगस्ति यत् स सम्बन्धः सम्बन्धिषु विशिष्टैक्यस्वीकृत इति ।[67] अतो रामानुजस्यापृथक्सिद्धिपदार्थः आभ्यान्तरसम्बन्धः, समवायश्च बाह्यसम्बन्धः ।

**निष्कर्षः –**

समवायः वैशेषिकदर्शनस्याधारभूतः पदार्थोऽस्ति । समवायपदार्थाभावाद्वैशेषिकदर्शनं भेदवादी दर्शनं न भवितुमर्हतीति । अत एव समवायसमन्र्धस्याधारं स्वीकृत्य न्यायदर्शनमपि स्वपदार्थानां मध्ये भेदं पारयितुं समर्थं इति । यतोहि संयोगे तु सम्बन्धीभेदः प्रत्यक्षेणैव अस्माभिः प्रतीयते, किन्तु समवायस्थले न तथा । समवायस्थले तु तन्तुषु पटस्यैक्यं प्रतीयते । अतो तत्र अभेदे सति भेदः समवायवशादेवेति ।

[53] न्या. सि. मु. का.- ११
[54] प. त. नि., पृ. ८७
[55] प. मं. पृ. -३५
[56] दिन. न्या. सि. मु. का. ११
[57] प्रभा. पृ. ४२
[58] न्या. वा. पृ. ५५ ( न्या. सू. १/१/२५ )
[59] प्र. पा. भा. पृ. २९१,
[60] न्या. क. पृ. ७५२
[61] वै. सू. ७/२/२७
[62] प्र. पा. भा. पृ. ६
[63] प्र. पा. भा. पृ. ७
[64] न्या. क. पृ. ४२
[65] प्र. पा. भा. पृ. २९५
[66] प्र. पा. भा.
[67] तत्त्वमुक्ताकलापः पृ ६४६ ( बनारस संस्करण )

**सन्दर्भग्रन्थसूची**


1. कणादरहस्यम् – शंकरमिश्र, सं. विन्ध्येश्वरीप्रसाद द्विवेदी, चौखम्बा संस्कृत सीरीज, सं. ४८ बनारस, १९१७
2. किरणावली – उदयनाचार्य, सं. विन्ध्येश्वरीप्रसाद द्विवेदी, चौखम्बा संस्कृत सीरीज, सं. ४८ बनारस, १९१७
3. तर्कभाषा – केशवमिश्र, सं. बदरीनाथ शुक्ल, मोतीलाल बनारसीदास, वारणासी, १९६८
4. तर्कसंग्रहः - अन्नम्भट्टः, बालशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
5. तर्कसंग्रहदीपिका - अन्नम्भट्टः, बालशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
6. न्यायकन्दली – श्रीधराचर्य, दुर्गाधर झा, गंगानाथ झा ग्रन्थमाला सं १, वाराणसी १९६३
7. न्यायमञ्जरी – जयन्तभट्ट, सूर्यनारायण शुक्ल, चौखम्बा संस्कृत सीरीज, वाराणसी १९७१
8. न्यायवार्त्तिक – उद्योतकर, विन्ध्येश्वरीप्रसाद द्विवेदी, बिब्लोथिका इण्डिका, कलकत्ता १८८७
9. न्यायसिद्धान्तमुक्तावली – भट्ट विश्वनाथपञ्चानन, चौखम्बा सुरभारती प्रकाशन, वाराणसी
10. प्रशस्तपादभाष्य – प्रशस्तपाद, नारायणमिश्र, काशी संस्कृत ग्रन्थमाला, वाराणसी, १९६६
11. मानमनोहर – वादिवागीश्वर, स्वामीयोगीन्द्रानन्द, षड्दर्शनप्रकाशन प्रतीष्ठान वाराणसी १९७३